सं.न.७३

संस्कृत

३४९। पुराण

७७०/पु. ३८

॥ आदिकल्पद्रुम ॥

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(1)

॥ अथ श्रीभक्तिकल्पद्रुम प्रारभ्यते ॥

" Joint property of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

|| श्रीगणेशायनमः || श्रीशंवंदेतमहंयस्यदयातारयतिनिमज्जयति || वैरेणापिभजंतंसंसृत्यब्धौसुखांबुधौयुगपत् || १ || श्रीवत्सकौ
स्तुभश्रीवक्षाःपीतांबरोघनश्यामः || मन्मानसारविंदेमिलिंदतात्संततंचिदानंदः || २ || मद्वचक्तयस्त्रिगुणतोनोजाताःस्वीयलीलयाध्ये
याः || इतिभक्तबोधनार्थंब्रह्मजयत्यत्रिजातंतत् || ३ || यस्त्रिगुणातीतःस्यादनसूयांवाबिभर्तिधर्मेण || तस्मैमयैवदत्तोहंस्यामित्यत्रि
वरदोव्यात् || ४ || धीरोवीरोरविकुलहीरोरामःसमःसदाश्यामः || कोपिपराजितकामोजयतिविभुर्योगिविश्रामः || ५ || सोभयदानोदा
रःसीतादारःसलक्ष्मणःशांतः || राजार्चितपदपद्मोराजापद्माचकोजयति || ६ || घोषनिवासिजनानांतोषकरंलीलयास्वभक्तानां || शोष
करंभवजलधेर्दोषहरंब्रह्मजयतिकृष्णाख्यं || ७ || वृंदारण्यविहारोगुंजाहारोमनोहरोदयितः || बालानांबालानांमित्रंत्वृदिजयतिमित्रश
शिदृष्टिः || ८ || सुरवरनुतपदपद्मस्त्रिपुरहरस्थिरचरेश्वरोगिरिदाः || हरहरइतिरवतुष्टोनरवरदानःसनःपायात् ||९|| हरेर्हरस्यचाभेदःशा
स्त्रेणगुरुणोदितः || अतश्चेतोनभिन्नत्वंजानामीहतयोःक्वचित् || १० || तथापिपद्यामलधामबहुधाममममानसं || आकर्षतितदेवाहंमो
हनंमहितंभजे || ११ || आमोदायसदायस्यनामसंकीर्तनंकलौ || जानेकगम्यरूपोयःपातुमांविठ्ठलोहरिः || १२ || ब्रह्मादीनामपिवा
ङ्नयस्यतोषायजायतेद्यापि || प्रेम्णातुकापिलौकिकवाणीयस्यप्रमोदकृत्सोव्यात् || १३ || अनेत्रःपुंडरीकाक्षःश्यामलःपांडुरंगकः ||
यज्ञभुग्भातिसर्वज्ञोरुक्मिणीशोप्याकिंचनः || १४ || डिंडीरपिरसःकश्चिच्छ्यामलोमधुराधिपः || अव्ययोदर्शनादस्तिनामतस्तोषपोष
कृत् || १५ || भीमरथ्यावनेकश्चित्तमालोविठ्ठलाभिधः || सर्वागमफलात्मास्तेविपत्रस्तापनाशकः || १६ || भीमावनेलसत्यत्रपुंडरी
कवरप्रदः || ऋक्षेशकुलराट्चित्रंगजेंद्रार्तिहरोहरिः || १७ || जडजातौधृतौदाक्ष्यंस्वंस्वान्बोधयितुंजनान् || शंखंचक्रमलंपाण्योर्दधाति
किमुवाहरिः || १८ || इष्टकामस्यदेवस्यवंदेपादयुगान्वितां || इष्टकामस्यभक्तानांसंपूर्तिःशाश्वतीयतः ||१९|| इष्टकांतुपरंतत्वमहंमन्ये

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(3)

भ. क. बुधायतः ॥ जगदाधारभूतोपियदाधारेणतिष्ठति ॥ २० ॥ शंभुर्हेरंबचंडांशुचंडिकाःप्रणमाम्यहं ॥ मयिप्रीतिंवितन्वंतुविष्णुभक्त्यानुकू पृ. स्त. १
ल्यतः ॥ २१ ॥ कुलदेवाश्रयेसर्वइष्टदेवानमस्कृताः ॥ मयिप्रीतिंप्रकुर्वंतुविष्णुभक्त्यानुकूल्यतः ॥ २२ ॥ मयिदेवानकुप्येयुर्विष्णुभक्ति
परेसति ॥ सर्वेषामादिभूतस्यतस्यांशाःसर्वएवहि ॥ २३ ॥ सर्वदासोहमस्म्येवयतःसर्वात्मकोहरिः ॥ ममभूयोप्यदोवाक्यंगुरुशास्त्रानुभु
॥ १ ॥ तिभिः ॥ २४ ॥ भारतीभारतीभातियस्यभागवतीतथा ॥ व्यासवैरागयभक्त्याढ्यावंदेव्यासंजगद्गुरुं ॥ २५ ॥ यःस्वंभागवतंज्ञानंस्व
सुतायव्यबोधयत् ॥ आदावंतेचकृष्णायमध्येजायनमांसिमे ॥ २६ शुकतातस्ययत्सूक्तंयस्यभागवतंमुखे ॥ श्रुतिमंजुलवाक्रूरला
घ्यःसद्विजःश्रेष्टईर्यते ॥ २७ ॥ यस्मिन्पुण्यवतांप्रीत्यैप्रोक्तः पुण्यजनक्षयः ॥ कृतंरामायणंयेनतस्मैवाल्मीकयेनमः ॥ २८ ॥ मा
तान्नपूर्णापिचविश्वनाथःपितानदीयांत्रिसरोरुहेभ्यः ॥ नमोस्त्वजस्रंकरवाणियैःस्युःश्रेयांसिभूयांस्युदितानिलोके ॥ २९ ॥ विष्णुब्रह्मात्रि
दत्ताद्यान्विठ्ठलांतान्गुरूनहं ॥ सच्चिदानंदरूपांस्तान्वंदेसुविनयान्वितं ॥ ३० ॥ प्रसन्नवदनंशांतंनादसल्लीनचेतसं ॥ योगिराजंनमा
मीहश्रीमद्विठ्ठलसद्गुरुं ॥ ३१ ॥ वंदेहरेर्गुरोःपादान्भूरिसुरिनमस्कृतान् ॥ दोषापत्हृतयेलोकप्रबोधाययदागमः ॥ ३२ ॥ भ्रांताःसंतो
भिगच्छंतुजडतीर्थानिसंततं ॥ हरिनामपदंयामितीर्थंबोधसुखप्रदं ॥ ३३ ॥ एकस्मादेकोर्थोभवतिततोनापरोत्रार्थः ॥ चत्वारःपुरु
षार्थाहरिगुरुपादांबुजप्रसादेन ॥ ३४ ॥ संधेःक्वचिद्विग्रहतःसमासाद्गुरोर्लघोर्वापिचवर्णतोन्ये ॥ भवेयुरर्थाःकिलभूररूपाआत्रार्यतःश्री ॥ १ ॥
हरितःपरोपि ॥ ३५ ॥ विश्वोत्पत्यादिकार्येषुविधींद्राद्यानियोजिताः ॥ सर्वेलघुपदंयातायतःसंस्तुतिहेतवः ॥ ३६ ॥ विश्वोद्धारेम
हाकार्येसाधवःशांतमूर्तयः ॥ सन्नियुक्तास्तएवेहसम्मतागुरुतांगताः ॥ ३७ ॥ यःश्रुतिशिरोगिरानिजशिष्यंसंबोधयन्भ्रमंहरति ॥ त
स्मैश्रीगुरुवर्यायाद्वैतायास्तुमत्प्रणतिः ॥ ३८ ॥ कोशेषुनिर्ममत्वंजातंतदपिस्वपूर्णताभाति ॥ चित्रंसद्गुरुकृपयाप्यकिंचनोभाग्यवद्दर्यः

(3A)

।। श्रीगणेशायनमः ।। वंदेप्रेममयींभक्तिंयामासाद्यमहाजनाः ।। अपिमोक्षंनवांछंतिसनुतांर्किकरायते ।। १ ।। भक्त्यासाध्यासाधना
भिख्ययायाप्रोक्ताभक्तिःप्रेमरूपाच्युतस्य ।। अस्याएतल्लक्षणंसम्यगत्रज्ञेयंसद्भिःसाधुबुध्याविविच्य ।। २ ।। उक्तंप्रागप्यदःश्रीशप्रेमभक्ति
सुलक्षणम् ।। प्रोच्यतेहिप्रियंप्रायोवारंवारंनिषेव्यते ।।३।। भक्तेःफलंमुक्तिरितिब्रुवंतुभवंतुमुक्ताःखलुनात्रवादः।।वयंतुगोविंदपदारविंदसत्प्रे
मतत्साध्यफलंवदामः ।।४।। गलितेपिभिदभावेभक्त्यर्थंकल्पितंयदिद्वैतं ।। मोक्षसुखादप्यधिकंसुखदंसंजायतेत्रभक्तानां ।। ५ ।। शरीरं
लीलयाकृत्वामुक्ताअपिसुलोलुपाः ।। रमंतेभगवत्येवमाहसातापिनीश्रुतिः ।।६।। यआत्मबोधाविगतान्यभावाःस्वलाभतृप्ताविनिवृत्तका
माः ।। तेप्याचरंत्यच्युतपादभक्तिमित्थंगुणःश्रीरघुनाथएषः ।। ७ ।। सत्यपिभेदापगमेनाथतवाहंनमामकीनस्त्वं ।। इतिषट्पद्यांशंकरगु
रुभिर्बोधेपिभक्तिरुचितोक्ता ।। ८ ।। ब्रह्मानुभूतिपूर्णाःसनकाद्यायेमहर्षयस्तेपि ।। कुर्वंतःप्रेममयींविष्णौभक्तिंप्रतिष्ठंते ।। ९ ।। देहस्थिति
र्यासनकादिकानांप्रारब्धतोस्तीतिवदंतिसंतः ।। भक्त्यर्थमेवेतितुयंवदामःप्रसादभाजःप्रथितायतस्ते ।। १० ।। अद्वैतस्यप्रशंसायैद्वैतंभक्तैर
पेक्षितं ।। छायासुखस्यनुत्यर्थंयथैवातपईरितः ।। ११ ।। भक्तिंधेनुंसद्रसाढ्यांविहायतस्यावत्संमोक्षमिच्छेद्बुधोन ।। गोर्वत्सस्यत्राण
तःसम्यगत्रसौरस्यंस्यादेवभक्तोनिकामं ।। १२ ।। भक्तिस्पर्शमणित्यक्त्वायःकांक्षेन्मोक्षकांचनं ।। तस्यस्वानंदपूर्णत्वंकथंस्यात्साधुसं
मतं ।। १३ ।। गंगासमुद्रेणगतैकभावंदधातिसौख्यंनवसंगमोत्थं ।। भक्तस्यवृत्तिःपरमात्मनैक्यंयातापिधत्तेभिनवाप्तिशर्म ।। १४ ।।
अपिनिजरूपदमीशंप्राप्ताभक्तिप्रकाशयतिसततं ।। कृष्णरसाकालिंदीजयतिचभक्तस्यकस्यचिद्वृत्तिः ।।१५।। दर्पणेसमुदितप्रतिबिंबोबिंब
तोनहिकदापिविभिन्नं ।। भक्तियुक्तइहमाधवरूपेसज्जनोभवतिनैवविभक्तः ।। १६ ।। बिंबरूपोच्युतःसाक्षाद्बुद्धिर्दर्पणतांगता ।। भक्तेतु
प्रतिबिंबत्वंभक्त्यैभक्तैःप्रकल्पितं ।।१७।। लीलावतारःपरमेश्वरःसकरोतिकर्माणिनालिप्यमानः ।। सविग्रहःसन्नपिसंगहीनस्तथैवतद्भक्त

(५)

भ. क. जनोविभाति ॥ १८ ॥ स्वेच्छयारमणायेदंविश्वमीशेनानिर्मितं ॥ भक्तोज्ञात्वाहरेरूपंप्रेमनिर्भरमानसः ॥ १९ ॥ वेदांतामृतसागरसारश्री उ. स्त. १
नाथसेविनांपुंसां ॥ नैवभयंजनिमृतितःस्याच्चविमुक्तिर्वरटीचेटी ॥ २० ॥ अवतारिमहाविष्णुलीलासुप्रेमतःसदा ॥ सादराएवजायंतेदरं
॥ १ ॥ तेषांभवेत्कथम् ॥ २१ ॥ नैवेशभक्तस्यभवेत्कदापिभयंद्वितीयाभिनिवेशतोयत् ॥ कारुण्यसिंधुःप्रभुरेषयेनसमाश्रितस्तस्यकुतोभिभूतिः
॥ २२ ॥ द्वैतंतुतेषांभयकृत्समुक्तंयेश्रीशभक्तौविमुखाभवंति ॥ येविष्णुभक्ताभुवनेत्रतेषांभीनाशनेनाशुसुहार्दकारि ॥ २३ ॥ दृश्यंवि
श्वंवासुदेवस्वरूपंज्ञात्वाहंतांसंपरित्यज्यहार्दात् ॥ श्रोतावक्तानामलीलागुणानांयःस्यात्किंवातस्यसंसारदुःखं ॥ २४ ॥ सर्वत्रसमतायस्य
सर्वरूपोचलःप्रभुः ॥ सएवरक्षितायस्यदययातस्यकिंभयं ॥ २५ ॥ दृढासक्तस्यभक्तस्यभीतिःस्याच्चेद्भवोद्भवा ॥ तस्यांनिवारितायांतुह
रौप्रीतिर्नवानवा ॥ २६ ॥ वासोपहाराद्द्रुपदात्मजायादुःखंसभायांपरमंयदासीत् ॥ निवारणात्तस्यकृताज्जवेनयदूद्वहेप्रेमभरोबभूव
॥ २७ ॥ दुःशासनःसंसदिकौरवाणांदुर्योधनाज्ञावशगोदुरात्मा ॥ चैलांचलंपार्षतकन्यकायाश्चकर्षदीनाच्युतमाव्हयत्सा ॥ २८ ॥
भीष्मःकुरुष्वभीष्मोगुरुरप्यगुरुर्द्विजिव्हयुक्तत्वात् ॥ विदुरोविदुरोप्यकृपःसकृपःसर्वेप्यपूर्वतांयाताः ॥ २९ ॥ दीनार्तबंधोकरुणैक
सिंधोयमादपिक्रूरतमादमुष्मात् ॥ अनन्यरक्षांकृपणामिमांमांसंरक्षनोपेक्षणमत्रयुक्तं ॥ ३० ॥ : दयावासइत्येत्रयोयादवेंद्रःसभा
यांस्मृतोदीनयापार्थपत्न्या ॥ असौभक्तकल्पद्रुमःश्रीमुकुंदस्तृतीयासमासेनसार्थःसमासीत् ॥ ३१ ॥ यंकेत्रलंगुणत्रिहीनमजंदशाभिःशू ॥ १ ॥
न्यंविदुर्मुनिगणाःश्रुतिशीर्षवाक्यैः ॥ तंतूल्लसद्दशपटंविविधंनिजांगेशौरिंसमैक्षतपुरोपिचयाज्ञसेनी ॥ ३२ ॥ अनंतकल्याणगुणस्वरूपै
र्भक्तावनाविर्भवनंमदीयं ॥ इतीवपांचालसुतापटैस्तैश्चकारबोधंसमितौस्वकीयान् ॥३३॥ शंखचक्रगदायुक्तंकृष्णंवासोमनोहरं ॥ अवैक्षत
सभायांचस्वतनौपार्षतीसती ॥ ३४ ॥ कृष्णंनेत्रंविश्ववृक्षस्यकृष्णानेत्राग्रेसाकृष्णनेत्रासभायां ॥ कृष्णंनेत्रंतत्कृपातःस्वदेहेप्रादुर्भूतंसाधु

Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan Mumbai

(5A)

भावादपश्यत् ॥३८॥ पीतांबरंचेतसिसंदधानाव्यलोकयत्सास्वतनौपुरश्च ॥ अंतर्बहिर्भेदविभिन्नभक्तोथिन्हंतदासद्रुपदात्मजायाः ॥३६॥
अनंतदेवस्यकृपातिरेकादनंतरूपात्किलमध्यतोस्याः ॥ अनंतवासांस्युदितानिभूयोवर्णैरनंतान्यपितानितानि ॥ ३७ ॥ धर्मस्यधर्मपत्नी
कृष्णाकृष्णांघ्रिचिंतनेसक्ता ॥ पांचालीपांचालीजाताश्रीवत्सवत्सवात्सल्यात् ॥ ३८ ॥ भगवान्भ्रातृभावेनपांचाल्यापरिचिंतितः ॥
तस्याःसपटरूपैस्तैस्संतानाधिकशर्मकृत् ॥ ३९ ॥ एवंभक्तप्रेमवश्योरमेशोभूयोभूयश्चावतीर्यात्रतिस्त्रान् ॥ भक्तोप्यास्मिन्प्रेमलुब्धोभव
न्सन्जन्मादिभ्योनैवभीतिंसमेति ॥ ४० ॥ संगेनहीनाजितदोषसंघाःश्रीरंगसत्प्रेमवशांतरंगाः ॥ रोमांचमंचंतिहसंत्यटंतिरुदंतिगर्ज
तिजयंतिसंतः ॥ ४१ ॥ भक्तिकल्पद्रुमेमुष्मिन्गंगाधरविनिर्मिते ॥ प्रथमःस्तबकोभूयादुत्तरार्द्धसतांमुदे ॥ ४२ ॥ इतिश्रीभाक्तिकल्पद्रुमे
उत्तरार्धेप्रेमभक्तिप्रशंसावर्णनंनामप्रथमःस्तबकःसंपूर्णतामगमत् ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

॥ ३९ भ्रमरङ्गितादस्मादिहजातोदेशिकमुखांबुजाच्चित्रं ॥ बोधाख्यद्विजराजोमुष्मात्स्वानंदजलधिरयं ॥ ४० ॥ भक्त्यागुरुपदपंकज
मधुनार्वंदेस्वसौख्यजलराशिं ॥ यद्रजसास्त्रेनहरतिपंकंजडभावमाशुनाशयति ॥ ४१ ॥ भवजलधिनाशहेतुःसततमुदयवानूकलं
कराहितश्च ॥ चित्रंश्रीगुरुवदनद्विजराजोयंतमोगिलति ॥ ४२ ॥ गुरुभ्यःसंतुसर्वेभ्यःसदाप्रणतयोमम ॥ तेषांप्रसादतोभूयाद्भक्ति
र्भगवतिस्थिरा ॥ ४३ ॥ कवयःकवयोनवयंकवयःसरसाःसरसानवयंसरसाः ॥ सुधियःसुधियोनवयंसुधियःसकलाःसकलानवयंस
कलाः ॥ ४४ ॥ नव्याकृतिप्रवीणत्वंनालंकारेषुविज्ञता ॥ नव्याकृतिरियंभक्त्यानालंभावमुपागता ॥ ४५ ॥ दोषान्समुत्सार्यगुणान्क
रोतुस्वभावतःकोपिबुधोजनोत्र ॥ येप्रार्थिताअप्यनुजुस्वभावास्तेषांभवेत्प्रार्थनयाफलंकिं ॥ ४६ ॥ इदंदोषयुतंकाव्यमपिश्लाघ्यंबुधै
र्यतः ॥ आदौमध्येवसानेस्मिन्नुत्तमश्लोकईर्यते ॥ ४७ ॥ अन्वयव्यतिरेकाभ्यांगुणानामच्युतप्रभोः ॥ सपद्यकविताश्राव्यावाच्या
स्याद्वामतासतां ॥ ४८ ॥ भक्तिकल्पद्रुमोग्रंथःसदाभीष्टफलप्रदः ॥ संतापहारकोभूयात्संतानाधिकशर्मकृत् ॥ ४९ ॥ भक्तिकल्पद्रुमे
मुष्मिन्गंगाधरविनिर्मिते पूर्वार्धस्तबकःपूर्णःप्रथमोस्तुसतांमुदे ॥ ५० ॥ इतिश्रीभक्तिकल्पद्रुमपूर्वार्धेमंगलस्तबकः ॥ १ ॥ श्रीकृ
ष्णार्पणमस्तु ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

|| श्रीगणेशायनमः || विष्णोःकेवलयाभक्त्याकृतकृत्योभवेद्यथा || कर्मज्ञानतपोयोगैर्नतथाबहुसाधनैः || १ || तावत्स्ववर्णाश्रमधर्म
कर्मसांगंचरेत्कोपिनरःप्रयत्नात् || यावन्नभक्तिर्भगवत्यखंडाभवेद्ययास्त्रांतसुखंनिरंतं || २ || धर्मस्यार्थस्यकामस्यचेतःशुद्धेश्चसंमतं ||
ज्ञानवैराग्यमुक्तीनांसाधनंहरिसेवनं || ३ || स्वनुष्ठितस्यधर्मस्यहरिभक्तिर्वरंफलं || भक्तिहीनमपिज्ञानंह्यामंप्राहुर्बुधाःकिल ||४|| धर्मः
सएवगदितोवहुभिर्मुनींद्रैर्भक्तिर्यतोभवतिमाधवएवपुंसः || अन्यःस्वनुष्ठिततयापिविराजतेनाकिंचित्फलोभवतियोहरिभक्तिहीनः || ५ ||
विश्वंविष्णुंमन्यतेविष्णुभक्तस्तन्वन्भक्तिंसर्वभूतेष्वजस्त्रं || सुव्यक्तोस्मिन्नुदंतिस्वात्मभावोऽव्यक्तासक्तःक्लेशमाप्नोत्यवश्यं ||६|| सुव्य
क्तेस्मिन्भुवनेजडतांमत्वाततोन्यरसमिच्छेत् || सतकुपदेशगामीभ्रमसाकुस्यात्तत्रकिंचित्रं || ७ || त्रिगुणमयेभवजालेवध्यंतेप्राणिनस्त्क
कालेन || श्रीमन्मुकुंदसत्कृतभक्तिमलब्ध्वानमुच्यंते || ८ || संसारकूपेपतितंमनुष्यंत्दृतेक्षणंवारजआदिदोषैः || कालाहिनाग्रस्ततनुं
नितांतंसमुद्धरेदत्रहरिंविनाकः || ९ || हरेर्व्यक्तिरभूल्लोकेसतांकामितदासतां || अवमत्यविमूढास्तांयांत्यहोकामदासतां || १० || निरा
कारोपिसाकारःसदामोदाकरश्रयः || देवक्यानंदनोभातिभक्तानांत्दृदयेनिशं || ११ || अजन्मातथानामरूपोगुणात्मास्वयंमास्यपत्नी
सुतोजोप्यनंगः || विनायातिपत्रेणखंयत्पदंसप्रभुर्भक्तितोभक्तसंतानरूपः || १२ || सदवनकर्त्रीभर्त्रीनदशाउच्चावचाःक्वचित्ध्येयाः ||
अंगीकृतानियस्माद्दशावतरणानिहरिणापि || १३ || वेषांतरेपिसुमहान्भुवनेयोग्यंस्वचिन्हमाधत्ते || इतिविष्णुर्मीनोभूदनिमिषवरतां
दधानःस्वां || १४ || जडजंतुर्नलोकेस्मिन्विद्यायाधारणेक्षमः || चित्रंमत्स्याकृतिर्भूत्वावेदानुद्धृतवान्विभुः || १५ || भृशंभक्तानुरक्त
स्त्वंव्यक्तंकर्तुंप्रसक्तधीः || स्वपृष्ठेमंदरागंतंचक्रेकूर्माकृतिःप्रभुः || १६ || यज्ञेशंयज्ञतोयज्वामदभेदेनमांभजेत् || इत्यसौयज्ञवाराहरूपंकिं
धृतवान्हरिः || १७ || रसावंतंहिरण्याक्षमसावंतमनीनयत् || यज्ञयूपवतींचक्रेसुज्ञभूपवतींभुवं || १८ || स्वभक्तरक्षणेदाक्ष्यमसतःशा

(7)

 

सनेक्षितौ ॥ नारींसिंहीयचरितेप्रकटंप्राभवत्प्रभोः ॥ १९ ॥ पुराणरूपोपिपिशिशुत्वमाप्तोह्रस्वोप्यनंतोबलियज्ञवाटे ॥ महावदान्योपिकु
याचकोभूदनुग्रहेच्छुः सकलस्वहर्ता ॥ २० ॥ सुपूतंचरितंविष्णोरपिक्रूरतरंयदि ॥ क्षत्रियासृङ्मयंतोयंजनानामतिपावनं ॥ २१ ? भव
॥ ३ ॥ जलधितर्तुकामैःसेव्योहंयत्नतःसदाविबुधैः ॥ इतितरणिसंततिप्रभुरभवच्छ्रीरामभद्रोनु ॥ २२ ॥ जनपावनत्वमपिधर्मसक्ततागुरुनम्र
तानिखिलहार्दपात्रता ॥ शरणार्थिरंजनमथारिभंजनंरघुनाथएवभुवनेस्तिसंसदा ॥ २३ ॥ संसारसिंधुंततुंयत्नादहमेवसर्वदासेव्यः ॥
इतितारकेशवंशेजातःकृष्णःसनःपायात् ॥ २४ ॥ गोष्ठेषुगोपीषुगिरिष्वगेषुलतासुवृंदावनभूमिजासु ॥ अनुग्रहोभक्तकदंबआस्तांविनि
ग्रहःशत्रुषुमोक्षदोस्य ॥ २५ ॥ सुमनोविद्विषामेषांमाभूत्पाखंडुदुस्तरं ॥ करुणाब्धिमोतिबुधःसचक्रेऽहिंसाप्रबोधनं ॥ २६ ॥ यःकेवलोपि
चतुरंगबलेनयुक्तः कल्क्याख्ययाबुधवरैरुदितोप्यकल्की ॥ योवर्ण्यतेवकृतहेतुतयामुनींद्रैःपायात्समांसुरवरःकलिकालभीतेः ॥ २७ ॥
योभक्तानांत्राणहेतोर्जगत्यांनानाजन्मान्यप्यबिभ्रद्बिभर्ति ॥ सोसौनित्यंदीनबंधुःपरेशःकारुण्याब्धिर्माधवःसेवनीयः ॥ २८ ॥ भक्त
कल्याणहेतोर्यःसाकारःसंभवत्यजः ॥ हरेःकःसेवनीयोन्यःकोवासत्वाकृतिःप्रभुः ॥ २९ ॥ सगुणंनिर्गुणमेकंमत्वायोभजतितरति
शीघ्रंसः ॥ तस्मादनन्यभावाद्भक्तोभूत्वाभजेत्सगुणं ॥ ३० ॥ त्यक्त्वासगुणंनिर्गुणसाक्षात्कारंभजेत्पुमान्यदिवा ॥ पंगुःक्षणात्सुमेरुलं
घनशक्तोनकिंतर्हि ॥ ३१ ॥ योनभजेत्श्रीकृष्णंसगुणंतंतस्यभगवतोमाया ॥ संमोहयेच्छरण्यंमायाधीशंभजेद्धरिंतस्मात् ॥ ३२ ॥ ॥ ३ ॥
मायांरात्रिंप्राहुर्निजतमसायागतिंनिरोधयति ॥ यस्यांनिद्रातिजनःस्वंनोजानात्यरिग्रस्तं ॥ ३३ ॥ सदसद्व्यक्तज्ञानंनजातु
चिदपिजायतेविनायत्नं ॥ स्वापक्रियाप्यवश्यंभवतिजन्मादयःस्वप्नाः ॥ ३४ ॥ तस्मात्सहस्रपादंभजेदमुंश्रीहरिं-
सदाभ्युदितं ॥ सर्वव्यापिनमेकंतेनभवेत्संततंसुदिनं ॥ ३५ ॥ अजंप्रपद्यमानोयःसंसृतिस्तस्यनोयतः ॥ अजातंनैवबध्नीयादतस्तंशरणं

(7A)

|| श्रीगणेशायनमः || अनंतस्यभक्ताअनंताअभूवन्भाविष्यंतिवाविद्यमानाअमानाः ॥ तथापिप्रभुप्रेमभावप्रबोधंप्रकर्तुंप्रवक्ष्याम्यहंकांश्चि
दत्र ॥१॥ कृतादिकल्यंतयुगेषुभक्ताःसुप्रेमयुक्ताअभवन्यईशे ॥ संक्षेपतस्तान्कथयामिसर्वान्वक्तुंकथंस्यामहमत्रशक्तः || २ ॥ यत्प्रेमव
शंगत्वक्षाभवत्तच्चित्सुखात्मकं ||प्रल्हादोवर्ण्यतेसोत्रनृहरिर्मयितुष्यतु ॥३॥श्रीमन्नरहरिसुचरितसुधेदितान्येवहार्दध्यानि॥प्रल्हादप्रेमभरप्र
काशनायप्रवक्ष्यंते ॥ ४ || अवतीर्यहरिःस्तंभाद्धिरण्यकशिपोरुरः ॥ वज्रादपिकठोरंतंददाराशुनिजैर्नखैः ॥ ५ || अरिंविदार्यापिनशांति
मापन्सुराविरिंचित्येतितदातिभीताः ॥ त्रैलोक्यसाधारणमानरूपाहरिप्रियांतांशरणंप्रजग्मुः ॥ ६ ॥ प्रभुप्रकोपानलशांतिकामास्तदांबुजाता
भयतःसुरास्ते ॥ किंचित्प्रशांताअभवन्मनोज्ञाचकारभर्त्तुःपुरतःशिशुंश्रीः ॥ ७ ॥ प्रल्हादंतंभक्तंदृष्ट्वाशांतोभूत्सश्रीशःसद्यः ॥ तद्भक्ता
नांत्राणायैवक्रूरोक्रूरोवैकुंठोयं ॥ ८ ॥ प्रल्हादस्याश्लेषादीशस्तस्याश्लेषात्प्रल्हादोसौ ॥आल्हादंयंप्रापत्तस्यप्राप्त्यैसद्भिर्मुक्तिर्मुक्ता ॥ ९ ||
प्रेम्णोवाचश्रीपतिस्तंस्वभक्तंसक्तंस्वीयेभृंगवत्पादपद्मे ॥धन्योसित्वंप्रेमपात्रंमदीयंमान्योलोकेसद्यशोस्तुत्वदीयं ॥ १० ॥ दृश्येविरक्ति
श्चपरानुरक्तिर्मयीश्वरेधैर्यमखंडितंते ॥ तवैवतोषादनृणीभवेयंनोचेन्मयादेयमितोस्तिकिंते ॥ ११ ॥ अहंतुपूर्वंस्मरणेनवत्सत्वयानिरुद्धो
खिलतत्वरूपः ॥ देवोनिरुद्धोपियमित्युवाचतद्भागधेयंप्रवदामिकीदृक् ॥ १२ ॥ रोमांचितकायोसौप्रल्हादस्तंरमावरंप्रोचे ॥
धन्योहंमान्योहंबालोप्यद्यप्रसादतस्तवभोः ॥ १३ ॥ शस्त्रादिभ्योरक्षितंमच्छरीरंस्वांघ्र्यासक्तंमानसंमेकृतंच || प्रत्यक्षो
सिश्रीपतेमत्पुरस्तात्किंकारुण्यंवर्णनेशक्यमेतत् ॥ १४ ॥ ऊचेहरिर्मेविफलंजनेस्मिन्नदर्शनंस्यादितिहिप्रसिद्धिः ॥ अतोधुनावत्स
वरंवृणीष्वप्रददामितेकांक्षितमाशुतुभ्यं ॥ १५ ॥ त्वयात्रकिंचिन्नहियाचितंचेत्कथंममैतत्सफलंवदस्यात् ॥ निशम्यवाचंनृहरेःसऊचेत्व
त्पादहार्दाच्चवरंमतंमे ॥ १६ ॥ शक्रस्थानंपारमेष्ट्यंपदंवायोगींद्राणांदुर्लभंनापवर्गं ।। श्रीमद्विष्णोनोकदापिप्रयाचेत्वत्पादाब्जप्रेमसंमग्न

Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai joint project of the

चेताः ॥ १७ ॥ यन्मोक्षसुखंनृहरेरतत्त्वत्पदहार्दसिंधुजोबिंदुः ॥ इतिमत्वायाचेहंपादयुगेकेवलंप्रेम ॥ १८ ॥ तृष्णाविष्णोविश्वसंजीव
नस्यप्राप्त्यातेसौनाशमाभैवसद्यः ॥ नैतत्किंवास्यात्फलंदर्शनस्यमुक्तिर्मुक्तापादहार्दनमुक्तं ॥ १९ ॥ प्रोचेप्रेम्णाश्रीपतिस्तंस्वभक्तंरा
ज्यंवत्सत्वंकुरुष्वैतदत्र ॥ प्रारब्धाद्वामन्निदेशात्सतांवामार्गस्याद्धारक्षणाद्वासमंतात् ॥ २० ॥ अथामौहरेराज्ञयादैवयोगात्स्वयंनिस्पृहः
साधुमार्गप्रदर्शी ॥ भुवोभारमस्थापयद्वाहुदंडेतदीयंधवंक्लेशनाशंस्वचित्ते ॥ २१ ॥ भक्तिकल्पद्रुमे गुष्मिन्गंगाधरविनिर्मिते ॥ द्वि
तीयःस्तवकोभूयादुत्तरार्द्धसतांमुदे ॥ २२ ॥ इतिश्रीभक्तिकल्पद्रुमेउत्तरार्द्धेद्वितीयःस्तबकः ॥ २ ॥ ॥ ॥ ॥

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

(8A)

॥ श्रीगणेशायनमः ॥ आसंख्येतायुगेभक्ताःश्रीरामायणकीर्तिताः ॥ वर्ण्यंतेरघुनाथांघ्रिप्रेमनिर्भरचेतसः ॥ १ ॥ स्वकृतरघूद्वहलीलालतो
दितंपद्यवर्गममुमत्र ॥ अभिमतभक्तप्रेमप्रकाशनायप्रवक्ष्यामि ॥ २ ॥ कौसल्यायानृपस्यापिप्रेमश्रीमद्रघूद्वहे ॥ जानक्यालक्ष्मणस्या
दावत्रविज्ञायतांबुधैः ॥ ३ ॥ रविकुलकमलदिनेशःसीताचक्षुश्चकोरचंद्रोभूत ॥ अवतीर्णःश्रीकांतोदशरथपुण्योदयोमूर्तः ॥ ४ ॥ भरतः
केकयपुत्र्यालक्ष्मणनामावभूवसौमित्रिः ॥ रिपुहाचत्रयएतेरामांशाएवसंप्रोक्ताः ॥ ५ ॥ एकश्चतुर्धासरमेश्वरोभूद्विदेहजाताकमलापि
तद्वत् ॥ ताभिःकृतंशीलगुणानुरूपैस्तैरेवसाकंकरपीडनंयत् ॥ ६ ॥ रामाययौवराज्यंदातुमतीवोत्सुकोदशरथोभूत् ॥ केकयपुत्रीवि
पिनंममायितुमेनंनिवारयामास ॥ ७ ॥ कैकेयीवशराजाज्ञाधारकःश्रीरघूद्वहः ॥ उत्सुकोविपिनंगंतुंलक्ष्मणंतमथाब्रवीत् ॥ ८ ॥ या
मित्वत्सवनंत्वंतुग्रामवासरतोभव ॥ एवंनाथकथंब्रूवेदासोहमनुगस्तव ॥ ९ ॥ तवपदभजनेसतिप्रभोसकलास्ताविपदोपिसंतुमे ॥ दिन
करकरमंडितेंबरेकिमुताराःप्रतिभांतिराघव ॥ १० ॥ नभोगपदोश्चरणाब्जयुग्मेसन्मानसस्थेतिरतिःशुचिश्च ॥ यःसर्वदारामगातिंवित
न्वन्सलक्ष्मणःसाधुगतिर्निहंसः ॥ ११ ॥ ततोजनकजागेहंगतोरामःसलक्ष्मणः ॥ दृष्ट्वातंसार्घ्यंयद्देवीसंभ्रमादुत्थितासती ॥ १२ ॥ कुरु
श्वशुरसेवनंजनकनंदिनित्वंगृहेचतुर्दशसमावनेष्वहमटन्समेष्यामिभोः ॥ प्रमुदितमिदंतदाक्षितिसुतासमाकर्ण्यसाब्रवीद्विरहजव्यथांतव
विभोसहिष्ये कथं ॥ १३ ॥ रजन्यभिख्ययारामचंद्रनैवमयाविना ॥ आकृतिःशोभनातिस्यादमाहंत्वांविनाविभो ॥ १४ ॥ पूताभूभृत्सुता
सीतात्वाहिन्येत्वमनायतः ॥ आनंदनीरधिंरामंनताजातानुसंगता ॥ १५ ॥ गत्वाथमातृभवनंनत्वाचरणौस्ववृत्तमावेद्य ॥ पत्न्यनुजा
भ्यांसाकंगमनानुज्ञामयाचतसुधीरः ॥ १६ ॥ दोषंदत्तवतीदैवेकौसल्योक्तवतीतदा ॥ मातातेजगतांभूयादवितासवितात्वयः ॥ १७ ॥
सुमंत्रेणसमानीतेतस्थूरथवरेत्रयः ॥ जग्मुस्तेनैवतेयत्रासनिषादःसखागुहः ॥ १८ ॥ उषित्वारजनीमेकामेकांतेयोमुनीश्वरैः ॥ ध्यातोया

तोपिगंगायाःपरंतीरंसनौकया ॥ १९ ॥ भरद्वाजाश्रमंप्रागाज्जानक्यालक्ष्मणेनच ॥ दत्वानंदंमुनींद्रायाचित्रकूटंनगंगतः ॥२०॥ आर्तोवा-
र्तांसुमंत्रात्तांश्रुत्वाभूपोतिमूर्छितः ॥ रामरामेतिजल्पन्सन्ननल्पांगतिमाययौ ॥ २१ ॥ समातुलपुरायातोभरतःप्रभुभक्तिमान् ॥ श्रुत्वा
तांसंस्थितिंराज्ञःप्राज्ञःप्रापद्विहस्ततां ॥ २२ ॥ भ्रातरंसंस्मरन्रामंविनिंदन्मातरंनिजां ॥ कृत्वापितृक्रियांज्येष्ठंद्रष्टुंस्विष्टंद्रुतंययौ ॥२३॥
गुहंभरद्वाजमुनिंचदृष्ट्वापृष्ट्वारघूणांप्रवरस्तदासौ ॥ ददर्शसेनासहितोनगंतंगंतव्यमारादतिविह्वलोभूत् ॥ २४ ॥ नत्वागुरुंमातृजनंचवृद्धा
न्पप्रच्छसाध्वींसपितुःप्रवृत्तिं ॥ आकर्ण्यहाहेतिवदन्रुदन्सन्नुकोकानुकारीनिपपातभूम्यां ॥ २५ ॥ मंदाकिन्यामथस्नात्वातर्पयित्वाज
लेनच ॥ मुन्यन्नेनैवपिंडान्सपितृभ्योदत्तवान्विभुः ॥ २६ ॥ प्रणम्यभरतोवदद्रघुवरंप्रभोसंप्रतिवनंसमुचितंकथंनरवरस्यतेयौवने ॥ प्रया
हिनगरंजनायनरतोभवेशाधुनामयाहिनगरंजनंतवविषह्यमेतत्किम् ॥ २७ ॥ पितुराज्ञयाधरित्रींपालयत्वनगमनमेवमेयोग्यं ॥ श्रुत्वेति
रामवचनंभरतःप्रेम्णाप्रभुंपुनरुवाच ॥ २८ ॥ रघुपदेहिपदाब्जानिषेवणंतवसदैवनराज्यमदोस्तुमे ॥ नृवरतामधिगम्यपदांबुजाद्विरहितः
कलभेयपरंसुखं ॥ २९ ॥ भुवितवपदसेवनंविहायप्रभुवरराज्यमिदंसुखायकिंवा ॥ करगतममृतंविमुच्यकोवागतरसमिच्छतिदूरदिक्क
दत्तं ॥ ३० ॥ अनृतादहमस्मिकातरोभरतत्वंकिलमद्वियोगतः ॥ धृतिमाप्नुहिवत्ससांप्रतंपुनरेष्याम्यवधिंप्रपालय ॥३१॥ त्वयैवसाकंवि
पिनंनरेंद्रयास्यामिनच्छामिचाकिंचिदन्यत् ॥ इदंविहास्यामिकलेवरंवाकथंसहिष्येविरहंसुदुःखं ॥ ३२ ॥ रहस्यंनिजंज्ञापयिष्यन्सगा
मोवसिष्ठायनेत्रांतसंज्ञांचकार ॥ तदैकांतदेशंप्रणीतोपिहार्दादुवाचेतितंसाश्रुनेत्रोतिदीनः ॥ ३३ ॥ वारितोयंमयारामोयातिमेजीवनंवनं ॥
मनश्चेतःसुसंतप्तंस्वांनमिच्छतिहेगुरो ॥ ३४ ॥ विद्वद्वरिष्ठोभगवान्वसिष्ठश्चकारतस्मिन्निजशक्तिपातं ॥ उवाचतंराघवएषविष्णुःस्वलील
यामानुषवेषधारी ॥ ३५ ॥ सदापत्रत्वभागेषपलाशदलनक्षमः ॥ छदच्छायःसतांचित्तेनित्यानंदागमोविभुः ॥ ३६ ॥ ज्ञात्वाचिदानंद

॥ ४ ॥

(9A)

व्रजेत् ॥ ३६ ॥ जनार्दनंयस्तनुवाङ्मनोभिःप्रपद्यमानःशरणंजनोत्र ॥ असावजोनार्दनएवतस्मैददात्यभीतिंचवरंस्वभीष्टं ॥ ३७ ॥
श्रुतिषुस्मृतिषुव्यासवाल्मीक्युक्तिषुसर्वतः ॥ कारणंशरणंसर्वलोकानांनंदनंदनः ॥ ३८ ॥ भवापगातारकमेवमत्वानरोभजेतोडुपसंत
तर्शिं ॥ प्रभावतोस्याशुमरीचिकास्यात्भवेत्ततःकौतुकसिंधुमग्नः ॥ ३९ ॥ भवभुजगाद्भीतःसन्गरुडध्वजभजनकृज्जनीयःस्यात् ॥
ज्ञात्वाविवर्त्तमेनंकुतुकात्तद्भक्तिसुखरक्तः ॥ ४० ॥ भक्तिकल्पद्रुमेमुष्मिन्गंगाधरविनिर्मिते ॥ पूर्वार्द्धेस्तबकःपूर्णोद्वितीयोस्तुसतां
मुदे ॥ ४१ ॥ इतिश्रीभक्तिकल्पद्रुमपूर्वार्धेद्वितीयस्तबकः ॥ २ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

Joint project of Rajawade Sanshodhan Mandal, Dhule and Yashwantrao Chavan Pratishthan, Mumbai.

(१०)

॥ श्रीगणेशायनमः ॥ नारायणकरुणामरतरुफलरूपोभवेत्सतांसंगः ॥ यस्मादच्युतभक्त्युल्लासरसःसोपिहार्दफलः ॥ १ ॥ साधवोदुर्लभास्तेस्युर्माधवोत्हृदियैर्धृतः ॥ अनार्यचर्याधुर्यास्तेनार्यागर्यास्तुपुष्कलाः ॥ २ ॥ सुलभानयेत्रकवयोहरिपादोल्लसितपुष्कलानंदाः ॥ जडजीवघातकायेचरंतिभुवनेतुबहवोन्ये ॥ ३ ॥ वत्सलाःखलुसंतःश्रीवत्सलांछनसेविनः॥ अभयंस्यात्ततःशीघ्रमुभयंयत्रनास्तितत् ॥४॥ येमस्तकेसच्चरणाब्जधूलिंवहंतितेषामखिलानिसद्यः ॥ रजांसिमांसीहलयंप्रयांतिभवंत्यहोसर्वगुणाश्रयास्ते ॥ ५ ॥ स्वल्पोपिसंगःखलुसज्जनस्यदत्वेहभक्तिंजगदीश्वरस्य ॥ संतारयत्यत्रभवांबुधौतत्प्रसंगमाहात्म्यविदोत्रयंकिं॥ ६ ॥ सत्संगोच्छिन्नपापस्यभाक्तिःस्यात्सुलभाविभौ ॥ त्रिवर्गश्चापवर्गोपिभक्त्यानोदुर्लभावुभौ ॥ ७ ॥ वेदीविदस्यार्थवेत्ताविधानीशांतोदांतःसर्वभूतात्मकःसन् ॥ कारुण्याढ्योमाधवप्रेमयुग्यःसेव्यःसाधुःसर्वदेशप्रियोयत् ॥ ८ ॥ वर्णीगेहीवावनस्थोयतिर्वायोगीकश्चिद्भोगभाग्भाग्यतोन्यः ॥ सम्यग्भक्तिज्ञानवैराग्यभाग्यःसाधुःपापान्पावयत्येवनित्यं ॥ ९ ॥ जनेनोच्छिद्यमानोपिदह्यमानश्चसर्वतः ॥ परानामोदयेत्सर्वान्पंडितःसिल्हकोयथा ॥ १० ॥ दह्यतेलोकदृष्ट्यैवखंड्यतेपिचदुर्जनैः ॥ देहातीतात्मताभाग्योदह्यतेनचखंड्यते ॥ ११ ॥ जनार्दनःपंडितएवसाधुर्विदग्धताभाङ्नचखंड्यमानः ॥ भूतंमहद्विष्ण्वभिधानमेतत्करोतिवद्ध्यंस्वजनैकलक्ष्यं ॥ १२ ॥ सज्जनेवापिकूटस्थात्मनिवाप्रत्ययेपिच ॥ उपसर्गःप्रयुक्तश्चेत्प्रयोक्तुर्दोषकृद्भवेत्॥ १३ ॥ विष्णुपदंभजतिसदाक्षयवृध्योःसाम्यमेवधत्तेयः ॥ सकलात्माद्विजराजस्ततोमृतंप्राप्यतेतेत्रिबुधैः ॥ १४ ॥ विष्णुपदप्राप्तःसन्तमोनयःकीदृगितिविजानाति ॥ हंसस्यतस्यसंगात्भवतिजडात्मापिसकलात्मा ॥ १५ ॥ पक्षबलेनासंख्याःसमुत्पतंतोद्विजाभवंत्वेते ॥ हंसस्योज्वलतांवागतिंमहत्वंनविंदंति ॥ १६ ॥ लघवोपिवामहांतःसंतुपतंगाव्यभिख्ययायुक्ताः ॥ विश्वंप्रकाशयतियःख्यातःकिलसोव्यभिख्यावान् ॥ १७ ॥ योकिंचनोपिजिह्मगवृतोपिवृषगःसदैवशुचिरूपः ॥ शिवइवसनरोविबुधैर्लो

(11)

भ. क. पू. स्त. ३

केस्यात्संततंसेव्यः ॥ १८ ॥ यःसकलकर्मसाक्षीनिजधर्मेषुप्रवर्तयतिलोकान् ॥ जाड्यनिवारणदक्षःसनमस्कार्योयथासूर्यः ॥ १९ ॥
सूर्याश्रयतःस्वल्पात्कालात्प्रतिपद्युतोजडात्मापि ॥ तमसोनिवारयित्र्यादिनेंदिनेवर्द्धतेकलया ॥ २० ॥ रघुवरगुणजालेनोद्गीतेनश्रोतुमान
सकुरंगान् ॥ येसन्नयंत्यचलतांचित्रमलुब्धाश्चधीवरास्तेपि ॥ २१ ॥ श्रीकृष्णलीलामृतवर्षयोगाद्भवाग्निशांतिंशरणागतानां ॥ कुर्वंतिये
॥ ५ ॥ विष्णुपदेतिसक्तास्तेसज्जनाजीवनदामतामे ॥ २२ ॥ यथायथासाधुसमागमःस्यात्तथातथाश्रीशकथाप्रसंगः ॥ यथायथात्रासकथाप्र
संगस्तथातथासौविमलांतरात्मा ॥ २३ ॥ यथायथानिर्मलमानसःस्यात्तथातथाचित्सुखरूपविष्णुः ॥ भवेद्धृदिस्थश्चयथायथासौतथा
तथाप्रेममयात्मरूपः ॥ २४ ॥ संगात्सतांभवेत्किलभक्तिःश्रीशस्यसद्गुरोःकरुणा ॥ परमश्रेयःप्राप्त्यैकुर्यात्सत्संगमंनरस्तस्मात् ॥२५॥
परीक्ष्यसंतंसहवासतोत्रभजेतधीमान्बहुकालतश्च ॥ सद्वेषतोवंचनवत्परायत्नवसंत्यसंतोधनलुंठनाय ॥ २६ ॥ अंतःकपटबाहुल्याद्बहि
र्धर्मपरायणाः ॥ नतेषांसंगमात्तापशांतिर्लोकस्यजायते ॥ २७ ॥ सारस्वतेरसेमग्नाअपिसाधुपदेस्थिताः ॥ उपलाइवकाठिन्यादंतर्वै
रस्यभूमयः ॥ २८ ॥ सदंभस्थितिमंतोपिबहुतृष्णाकुलानराः ॥ नरसंप्रतिविंदंतिनरसंप्रतिकिंब्रुवे ॥ २९ ॥ सदंभोयुक्तएवेतिन्ह
दवत्कीर्त्यतेमलः ॥ नीरसत्वयुतःसोंतःपंकबाहुल्यवानपि ॥ ३० ॥ शुचित्वमपिसाद्गुण्यंयत्रनैववियुज्यते ॥ श्लाघ्यासरलता
भातिल्हदिपुण्यवतःक्वचित् ॥ ३१ ॥ सरलाविरलालोकेपरलाभेननिर्वृताः ॥ स्वार्थमेवयतंतेतेसंत्यसंतःसहस्रशः ॥ ३२ ॥ वाता ॥ ५ ॥
शनोपिपुष्ट्यैभोगस्यैवासुत्वृच्छ्रुतिविहीनः ॥ गूढपदोयदिसविधेवसेत्सुखंस्यात्कथंपुंसः ॥ ३३ ॥ भोगासक्तोनितरांगानेरक्तस्ततो
भुजंगोसौ ॥ त्याज्योदूरंसद्भिःस्यादुपदेशेकथंयोग्यः ॥ ३४ ॥ यःसन्विपरीतात्माहिनस्तिपुरुषांनिजाश्रियःस्पर्शात् ॥ तद्रोगियुक्त
देशंत्यक्त्वादूरंसुखंजीवेत् ॥ ३५ ॥ भवतिजडस्यकुसंगात्पंककरत्वंचकुटिलगामित्वं ॥ भ्रांतिश्चाधःपातःकिंवाचित्रंबुधाअत्र ॥ ३६ ॥

(11 A)

निपतत्यधोनिरंतरमापिपंकंसर्वदाकरोत्येव ॥ वर्धयतितृणंनित्यंपरिहार्यःकिंजडस्वभावोयम् ॥ ३७ ॥ साध्वसंगतएवात्रसाध्वसं
गेनमोहतः ॥ साध्वसंगात्पुनःसाधुःसाध्वबाधपदंगतः ॥ ३८ ॥ दुर्जनागर्जनांकृत्वातर्जयंतिभृशंजनं ॥ तेषामुपार्जनंत्यक्त्वाकार्यं
सद्भिर्विसर्जनं ॥ ३९ ॥ असतःसंगम्मान्नूनंसतआमोदहीनता ॥ संयोगाद्रामठस्येहयथाकाश्मीरजन्मनः ॥ ४० ॥ द्यूतंमद्यंहिंसा
कांताऽनर्थप्रदाभवंतिपुंसां ॥ तस्माद्दुर्जनसंगंविहायविहरेस्सततांसंगी ॥ ४१ ॥ पापानिनाशयतिकारयतीहसाधुकर्माणिचित्तशुचितां
तनुतेसदिष्टं ॥ भक्तिंहरौदिशतिचात्मसुखानुभूतिंसत्संगमःसुरतरुंजयतिप्रकामं ॥ ४२ ॥ भक्तिकल्पद्रुमेमुष्मिन्गंगाधरविनिर्मिते ॥
पूर्वार्धस्तबकःपूर्णस्तृतीयोस्तुसतांमुदे ॥ ४३ ॥ इतिश्रीभक्तिकल्पद्रुमेपूर्वार्धेतृतीयस्तबकः ॥ ३ ॥ ॥ ॥ ॥ ॥ ॥ ॥

Joint Project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan

(12)

॥ श्रीगणेशायनमः ॥ आयुषोतीव्रचांचल्यंमानुषंजन्मदुर्लभं ॥ विषयाबंधकास्तस्मात्तद्विरागोहरिंभजेत् ॥ १ ॥ विनायेनभवेन्नैव
चित्तवृत्तिःस्थिराक्वचित् ॥ वैराग्यमुच्यतेतस्मात्ज्ञानभक्त्येकसाधनं ॥ २ ॥ मानुषंजनुरासाद्यपरेतत्वेनयन्मतिः ॥ तमप्याहुर्बुधाश्चि
त्रंपरेतत्वेस्थितंनरं ॥ ३ ॥ संप्राप्यमानवत्वंजित्वारीन्स्वपदभाक्भवेत्सैकः ॥ क्षेत्रारामाबहवोगोपालाअत्रदृश्यंते ॥ ४ ॥ नरतां
प्राप्ययोमोहाद्भोगासक्तोभवेज्जनः ॥ पशुःसमानत्राकारोमनुज्वलात्मानसंमतः ॥ ५ ॥ बहुजन्मस्वप्यनृतागमात्सुदुःखानिलब्धानि ॥
प्राप्यापिनृतांचित्रंनतंविमुंचत्यसौमोहात् ॥ ६ ॥ नृभुक्तोप्यनुभवत्सिसमाश्रितयेजनामहामोहात् ॥ क्षिपनिहरिस्तानासुरजन्मसुयुक्तंस
दैत्यारिः ॥ ७ ॥ मानुषंजनुरिदंसुदुर्लभंतद्भजेदकविवर्जितोहरिं ॥ नाकिनायकदुरापमद्वयंप्राप्नुयात्सुकविलभ्यसुखंतत् ॥ ८ ॥ बा
लोहंविचरिष्यामीच्छातःश्रेयसेयतिष्येहं ॥ तरुणःसंस्तरुणीर्हसोमिस्यैवास्त्ययंकालः ॥ ९ ॥ वृद्धःसन्मंदात्माकिमहंकर्त्तुंसमर्थोत्र ॥
यातंतत्तारुण्यंयस्मिन्नक्षाणिदक्षाणि ॥ १० ॥ पलितंवलितंजातंतरुणंभुमंशरीरकं ॥ चरितंचरितंदुष्टंनक्वापिसुकृतंकृतं ॥ ११ ॥ बा
ल्येयतेततस्माच्छ्रेयसइहयौवनेजरायांच ॥ सततंतेपुष्वयःपुनर्दशल्पःपुष्टिमान्क्षीणः ॥ १२ ॥ इदमिदमिदंचवासःसम्यक्प्रक्षाल्यतद्द्
ष्कर्मकुर्यां ॥ मत्वाम्रियतेरजकस्तद्वत्श्वोहंकरिष्यामि ॥ १३ ॥ नरजन्मैवपापस्यमूलंपुण्यस्यचेरितं ॥ तस्मात्धितेच्छुर्धर्मेणपाप
माशुविनाशयेत् ॥ १४ ॥ धर्मेणदेवद्विजपूजनानिधर्मेणतृप्तिश्चगतिःपितॄणां ॥ धर्मेणशुद्धिर्मनसोपितन्वाधर्मेणलोकेभवतीष्ट
सिद्धिः ॥ १५ ॥ बताज्ञानवशादेवधर्ममार्गपराङ्मुखाः ॥ पापाभवंतिनोचित्रंविद्वांसोपिकलौयुगे ॥ १६ ॥ धर्मस्यचाप्यधर्मस्यक्षयः
पुष्टिर्युगेयुगे ॥ क्षयपुष्टयोस्तयोरस्मिन्पूर्णतैवकलौभुवि ॥ १७ ॥ धर्मस्यस्थापकःश्रीशःसम्यक्संतश्चरक्षकाः ॥ तथापिक्षीणतांधत्ते
श्रेयान्प्रायोनवर्द्धते ॥ १८ ॥ अधर्मःक्षतावेकपादेनसत्येपदाभ्यांपदैर्वाद्वितीयेतृतीये ॥ चतुर्भिश्चतुर्थेयुगेधर्महानिर्गुणिष्वेवनूनंकृशत्वं

Joint project of the Rajwade Sanshodhan Mandal, Dhule and Yashwantrao Chavan Pratishthan, Mumbai.

(13)

 

समेति ॥१९॥ अस्योद्भवोऽभवदिहप्रगएवयस्मात्तस्मात्कृशत्वमगमात्किलधर्मएषः ॥दैवज्ञवर्यवचनंवसुधातलेस्मिन्जन्मास्थितोदिनकरः
कुरुतेंगपीडां ॥ २० ॥ तपःशौचदयासत्यपरोधर्मंसमाचरेत् ॥ तपआदिविहीनस्यभवेत्कर्मयदासुरं ॥ २१ ॥ यत्रनतपोनशौचंनदया
सत्यंनविद्यतेसाधु ॥ असदेवकर्मतत्स्याद्व्यर्थंव्यस्तंसमस्तमपि ॥ २२ ॥ वाङ्मनोवर्ष्मभिस्तप्तंतपोयैर्हरितुष्टये ॥ तापसानामहंतेषां
तापसत्वंनविद्यते ॥ २३ ॥ शुचित्वमेवसंपाद्यंबहिरंतःसदानरैः ॥ साधनंसर्वधर्माणांज्ञानस्यचयदीरितं ॥ २४ ॥ दयामयंविजानाति
सुखायसकलोजनः ॥ तदभावंनिरीक्ष्यैवदुर्भाग्यंयद्विनिंदति ॥ २५ ॥ चिरंजीवतुसानंदंसदयःश्रीयुतोस्तुसः ॥ अदयैःपृथिवीभारभूतैः
किंबहुभिःफलं ॥ २६ ॥ दययासुकीर्तिरिहजायतेनृणांदययैवसर्वजनवश्यताभुवि ॥ दययैवयात्यखिललोकवंद्यतांनदयासमंरघुपतेः
सुतोषणं ॥ २७ ॥ अदयातुयातुरूपंकरोतिसायातुनाशमलं ॥ सदयोदयोस्तुसततंगायंतिगायनाःप्रेम्णा ॥ २८ ॥ सत्यंसत्वमहंमन्ये
तद्विदायत्रमात्रतः ॥ सत्यसत्ववतोर्यस्मान्नाचारोभिद्यतेक्वचित् ॥ २९ ॥ धर्ममादौसमाश्रित्ययथाशक्तिकलौबुधः ॥ संसाराब्धेःसमु
त्तीर्णोभवेद्भक्त्येकतत्परः ॥ ३० ॥ श्रीशैकमतयोयेस्युर्विषयेषुपराङ्मुखाः ॥ चरंतुधर्ममात्रातेदोषभाजोभवंतिन ॥ इतिधर्म
प्रशंसनं ॥ अथधनादिगर्हा ॥ सर्वेषामिष्टतमंधनमर्पितंविधनत्वेनुःस्यात् ॥ यत्रविवेकःसुलभोभीहानिस्तद्वरंदैन्यं ॥ ३१ ॥
मत्वाधनंमदीयंददातिभुंक्तेनयोमहामोहात् ॥ जन्मांतरेसभोगीभूत्वापिनभोगभुग्भवति ॥ ३२ ॥ स्त्रीसूनायूतानांमदि
रायायोगदंधनंयस्मात् ॥ तस्मात्कलेर्निवासंप्राहुर्नित्यंबुधाएतत् ॥ ३३ ॥ मज्जंतोपिभवाब्धौवस्विच्छंत्यतितरांनरामो
हात् ॥ केचनलब्धेतस्मिन्स्पर्शविहीनानिमज्जंति ॥ ३४ ॥ अशब्दोविसर्गेणयुक्तोभवेचेत्गुरुःश्रीधराभिख्ययाचप्रसिद्धः ॥ सए
वाविसर्गोलघुश्चाप्यभावेनिषेधेप्रयुक्तःपुमान्किंनतद्वत् ॥ ३५ ॥ साधनवत्ताश्लाघ्यायत्रायंस्वंसुखंपुमान्भुंक्ते ॥ भोगेदानेप्यनहंभावो

## मूळ प्रत पाहण्यासाठी संपर्क

---


**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**
राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)
**दूरध्वनी क्रमांक** (०२५६२) २३३८४८
**Email ID** : rajwademandaldhule@gmail.com